उल्लास
ULLAS
जन जन साक्षर
नव भारत साक्षरता कार्यक्रम

सा विद्या या विमुक्तये
CELL FOR NATIONAL CENTRE FOR LITERACY
राष्ट्रीय साक्षरता केंद्र–प्रकोष्ठ

अधिगमस्य प्रतिफलानि

आधारभूत-साक्षरता च आधारीय-सङ्ख्याज्ञानम्

विद्ययाऽमृतमश्नुते
एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

अधिगमस्य प्रतिफलानि

आधारभूत-साक्षरता
(भाषा)

१. अक्षराणां ध्वनिं तेषाम् आकृतिभिः सह योजयन्ति।

२. पदेषु पृथक्तया अक्षराणाम् अभिज्ञानं कुर्वन्ति।

३. स्वराणाम् एवञ्च तेषां मात्राणाम् अभिज्ञानं कुर्वन्ति।

४. 'अक्षरेभ्यः पूर्ण-पाठ्यवस्तु प्रति' एवञ्च 'पूर्ण-पाठ्यवस्तुनः अक्षराणि प्रति' इति स्तरद्वये पठनेन लेखनेन च सम्बद्ध-प्रक्रियया सम्बद्धाः भवन्ति।

५. विविध-सन्दर्भेषु प्रयुक्त-दैनिक-वस्तूनां माध्यमेन पठन्ति लिखन्ति च। (हिन्द्याम् अस्पष्टता)

६. चित्राणि अथवा सन्दर्भान् अधिकृत्य अनुमानम्, सम्पूर्णशब्दस्य सञ्ज्ञानम्, निष्कूटनम् (डीकोडिंग) इत्यादिभिः विभिन्न-विधिभिः पठन्ति।

७. प्रदत्तैः अक्षरैः ध्वनिभिर्वा आरभ्यमाणानां समाप्यमानानां च पदानां सूचीं कुर्वन्ति।

८. स्पष्टतया अक्षराणि, पदानि लघु-पाठ्यवस्तु च लिखन्ति।

९. भाषायां पुनः पुनः प्रयुज्यमानानां पदानां सञ्ज्ञानं कुर्वन्ति।

१०. स्वपरिवेशे सामान्यरूपेण उपलब्धं मुद्रितं पाठ्यपुस्तकं पठन्ति एवञ्च स्व-जीवनस्य अनुभवैः परिस्थितिभिः वा योजयन्ति।

११. प्रवेशिकायाः भाषया स्वभाषया वा वस्तूनां नामानि लिखन्ति।

१२. कस्य कस्याः अपि वा सहायतया एवञ्च क्रमशः स्वतन्त्ररूपेण पाठ्यवस्तु पठन्ति।

१३. पाठ्यवस्तुनः आधारेण प्रश्नान् (प्रतिक्रिया, टिप्पणी, तर्कः, मतम् इत्यादिरूपेण) उत्तरन्ति।

१४. विशिष्टबिन्दूनाम् अभिज्ञानार्थं विषयस्य पाठ्यवस्तुनः वा सन्दर्भे चर्चां कुर्वन्ति।

अधिगमस्य प्रतिफलानि

आधारीय-सङ्ख्याज्ञानम्
(गणितम्)

१. १ तः आरभ्य १००० पर्यन्तं सङ्ख्याः स्व-दैनिक-जीवनस्य सन्दर्भेषु पठन्ति लिखन्ति च।

२. १ तः ९९९ पर्यन्तं सङ्ख्यासु एककस्य दशकस्य शतकस्य च सञ्ज्ञानं कुर्वन्ति।

३. समम् '=' सङ्कलनम् '+' व्यवकलनम् '-' गुणनम् '×' विभजनम् '÷' इति एतेषां चिह्नानां सञ्ज्ञानं कुर्वन्ति।

४. सङ्कलनस्य व्यवकलनस्य गुणनस्य विभजनस्य च संक्रियाणां दैनिक-जीवनस्य सन्दर्भेषु प्रयोगं कुर्वन्ति।

५. ५००, २००, १००, ५०, २०, १०, ५, २ तथा च १ रूप्यकाणां धनपत्रकाणां नाणकानां च सञ्ज्ञानं कृत्वा विनिमयं कुर्वन्ति।

६. दैनिक-जीवनस्य विविधेषु सन्दर्भेषु वस्तूनां, स्थानादीनां समान-भागेषु विभजनं कुर्वन्ति । समानभागानाम् आधारेण अर्धस्य, चतुर्थांशस्य तृतीयांशस्य च सञ्ज्ञानं कुर्वन्ति।

७. अर्धं, चतुर्थांशं तृतीयांशं च भिन्न-सङ्ख्या-रूपेण लिखन्ति।

८. द्विपक्षीय-आकारः, यथा – त्रिभुजः, चतुर्भुजः, गोलम् तथा त्रिपक्षीय-आकाराः, यथा वृत्ताकारः, बेलनाकारः, शंक्वाकारः, घनाकारः, इत्यादीनाम् एतेषां वैशिष्ट्येन सह चर्चां कुर्वन्ति । एतेषां च दैनिक-जीवने उपयोगम् अपि कुर्वन्ति।

९. आकृतीनां सङ्ख्यानां च प्रारूपस्य (पैटर्न की) सञ्ज्ञानं विस्तरणं निर्माणं च कुर्वन्ति।

१०. मानक-अमानक-एककैः दीर्घतायाः, भारस्य आयतनस्य च मापनं कृत्वा सम्बद्धेषु एककेषु अन्तस्सम्बन्धं बोधयन्ति।

११. दैनिक-जीवने वस्तूनां मूल्यस्य अनुमानं तेषां परिमाणस्य मूल्यस्य च अनुसारं कुर्वन्ति।

१२. घट्याम् (एनालाग/डिजिटल) होरा-निमेष-क्षण-प्रारूपेण समयं पठन्ति एवञ्च प्रातःकालस्य मध्याह्नकालस्य सायंकालस्य रात्रिकालस्य च सन्दर्भे समयं बोधयन्ति।

१३. होराः, निमेषाः क्षणाः च इत्येतेषां परस्परं सम्बन्धस्य चर्चां कुर्वन्ति।

१४. २४ होरायाः घट्याः समयं १२ होरायाः घट्याः समये परिवर्तनं कुर्वन्ति।

१५. स्वपरिवेशे प्रचलितायां दिनदर्शिकायां सप्ताहस्य दिनानां, विशिष्टतिथीनां वर्षस्य मासानां च सञ्ज्ञानं कुर्वन्ति।